# श्री हयग्रीव स्तोत्रम्

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदांताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

ज्ञानानंदमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥ 1

स्वतः सिद्धं शुद्धस्फटिकमणि भूभृत्प्रतिभटं
सुधासध्रीचीभिर्द्युतिभिरवदातत्रिभुवनम् ।
अनंतैस्त्रय्यंतै रनुविहित हेषा हलहलं
हताशेषा वद्यं हयवदनमीडेमहि महः ॥ 2

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरि विततिर्बोधजलधेः ।
कथादर्पक्षुभ्यत्कथककुल कोलाहलभवं
हरत्वंतर्ध्वांतं हयवदन हेषा हलहलः ॥ 3

प्राची संध्या काचि दंतर्निशायाः प्रज्ञादृष्टेरंजन श्रीरपूर्वा ।
वक्त्री वेदान् भातु मे वाजिवक्त्रा वागीशाख्या वासुदेवस्य मूर्तिः ॥ 4

विशुद्ध विज्ञान घन स्वरूपं विज्ञान विश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥ 5

© 2022 Vedam Nadam

अपौरुषेयैरपि वाक्प्र पंचैः अद्यापि ते भूतिमदृष्टपाराम् ।
स्तुवन्नहं मुग्ध इति त्वयैव कारुण्यतो नाथ कटाक्षणीयः ॥ 6

दाक्षिण्यरम्या गिरिशस्य मूर्तिः देवी सरोजासन धर्मपत्नी ।
व्यासादयोऽपि व्यपदेश्यवाचः स्फुरन्ति सर्वे तव शक्तिलेशैः ॥ 7

मंदोऽभविष्यन्नियतं विरिंचो वाचां निधे वंचितभागधेयः ।
दैत्यापनीतान् दययैव भूयोऽ प्यध्यापयिष्यो निगमान् न चेत्त्वम्॥ 8

वितर्कडोलां व्यवधूय सत्त्वे बृहस्पतिं वर्तयसे यतस्त्वम् ।
तेनैव देव! त्रिदशेश्वराणां अस्पृष्ट डोलायित माधिराज्यम् ॥ 9

अग्नौ समिद्धार्चिषि सप्ततंतोः आतस्थिवान् मंत्रमयं शरीरम् ।
अखंडसारैर्हविषां प्रदानैः आप्यायनं व्योमसदां विधत्से ॥ 10

यन्मूलमीदृक् प्रतिभाति तत्वं या मूलमाम्नाय महाद्रुमाणाम् ।
तत्वेन जानन्ति विशुद्ध सत्वाः त्वामक्षरामक्षरमातृकांते ॥ 11

अव्याकृताद् व्याकृतवानसि त्वं नामानि रूपाणि च यानि पूर्वम् ।
शंसंति तेषां चरमां प्रतिष्ठां वागीश्वर त्वां त्वदुपज्ञवाचः ॥ 12

मुग्धेंदुनिष्यंदविलोभनीयां मूर्तिं तवानंद सुधा प्रसूतिम् ।
विपश्चितश्चेतसि भावयंते वेलामुदारामिव दुग्धसिंधोः ॥ 13

© 2022 Vedam Nadam

मनोगतं पश्यति यः सदा त्वां मनीषिणां मानस राजहंसम् ।
स्वयम् पुरोभाव विवादभाजः किंकुर्वते तस्य गिरो यथार्हम् ॥ 14

अपि क्षणार्धं कलयंति ये त्वाम् आप्लावयंतं विशदैर्मयूखैः ।
वाचां प्रवाहै रनिवारितैस्ते मंदाकिनीं मंदयितुं क्षमन्ते ॥ 15

स्वामिन् भवद्ध्यान सुधाभिषेकात् वहंति धन्याः पुलकानुबंधम् ।
अलक्षिते क्वापि निरूढमूलं अंगेष्विवानंद धुमंकुरंतम् ॥ 16

स्वामिन्! प्रतीचा हृदयेन धन्याः त्वद्ध्यान चंद्रोदय वर्धमानम् ।
अमान्तमानंद पयोधिमंतः पयोभिरक्ष्णां परिवाहयंति ॥ 17

स्वैरानुभावास्त्वदधीन भावाः समृद्धवीर्यास्त्वदनुग्रहेण ।
विपश्चितो नाथ तरन्ति मायां वैहारिकीं मोहन पिंछिकां ते ॥ 18

प्राङ्निर्मितानां तपसां विपाकाः प्रत्यग्रनिःश्रेयस संपदो मे ।
समेधिषीरंस्तव पादपद्मे संकल्प चिंतामणयः प्रणामाः ॥ 19

विलुप्त मूर्धन्य लिपि क्रमाणाम् सुरेंद्र चूडापद लालितानाम् ।
त्वदंघ्रि राजीव रजःकणानां भूयान् प्रसादो मयि नाथ! भूयात् ॥ 20

परिस्फुरन्नूपुर चित्रभानु प्रकाश निर्धूत तमोनुषंगाम् ।
पदद्वयीं ते परिचिन्महे ऽन्तः प्रबोध राजीव विभात सन्ध्याम् ॥ 21

© 2022 Vedam Nadam

त्वत्किंकरालंकरणोचितानां त्वयैव कल्पांतर पालितानाम् ।
मंजुप्रणादं मणिनूपुरं ते मंजूषिकां वेदगिरां प्रतीमः ॥ 22

संचिंतयामि प्रतिभादशास्थान् संधुक्षयन्तं समय प्रदीपान् ।
विज्ञान कल्पद्रुम पल्लवाभं व्याख्यान मुद्रा मधुरं करं ते ॥ 23

चित्ते करोमि स्फुरिताक्षमालं सव्येतरं नाथ करं त्वदीयम् ।
ज्ञानामृतोदंचनलम्पटानां लीलाघटी यंत्रमिवाश्रितानाम् ॥ 24

प्रबोध सिंधोररुणैः प्रकाशैः प्रवाळ संघातमिवोद्वहंतम् ।
विभावये देव सपुस्तकं ते वामं करं दक्षिणमाश्रितानाम् ॥ 25

तमांसि भित्वा विशदैर्मयूखैः संप्रीणयन्तं विदुषश्चकोरान् ।
निशामये त्वां नवपुण्डरीके शरद्घने चंद्रमिव स्फुरन्तम् ॥ 26

दिशन्तु मे देव सदा त्वदीयाः दयातरंगानुचराः कटाक्षाः ।
श्रोत्रेषु पुंसाममृतम् क्षरंतीं सरस्वतीं संश्रित कामधेनुम् ॥ 27

विशेषवित्पारिषदेषु नाथ! विदग्ध गोष्टीसमरांगणेषु ।
जिगीषतो मे कवितार्किकेंद्रान् जिह्वाग्र सिंहासनमभ्युपेयाः ॥ 28

त्वां चिन्तयंस्त्वन्मयतां प्रपन्नः त्वामुद्गृणन् शब्दमयेन धाम्ना ।
स्वामिन् समाजेषु समेधिषीय स्वच्छंद वादाहव बद्धशूरः ॥ 29

© 2022 Vedam Nadam

नानाविधानामगतिः कलानां न चापि तीर्थेषु कृतावतारः ।
ध्रुवं तवाऽनाथपरिग्रहायाः नवं नवं पात्रमहं दयायाः ॥ 30

अकंपनीयान्यपनीति भेदैः अलंकृषीरन् हृदयं मदीयम् ।
शंकाकळंकापगमोज्ज्वलानि तत्वानि सम्यंचि तव प्रसादात् ॥ 31

व्याख्या मुद्रां करसरसिजैः पुस्तकम् शंखचक्रे
बिभ्रद्भिन्नस्फटिकरुचिरे पुंडरीके निषण्णः ।
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन्मां
आविर्भूयादनघ महिमा मानसे वागधीशः ॥ 32

वागर्थ सिद्धिहेतोः पठत हयग्रीवसंस्तुतिं भक्त्या ।
कवितार्किककेसरिणा वेंकटनाथेन विरचितामेताम् ॥ 33

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेंकटेशाय वेदान्तगुरवे नमः ॥ 34

॥ इति कवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य
श्री मद्वेंकटनाथस्य वेदंताचार्यस्य कृतिषु
श्री हयग्रीवस्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam